# Narayanaproktam Shri Krishna Stotram

# નારાયણપ્રોક્તં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Narayanaproktam Shri Krishna Stotram

File name : nArAyaNaproktaMshrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 202/54-75||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# નારાયણપ્રોક્તં શ્રીકૃષ્ણસ્તોત્રમ્

(નારાયણપ્રોક્તંશ્રીકૃષ્ણકવચમ્)
વસિષ્ઠેન પ્રદત્તેન મન્ત્રં તં ષોડશાડક્ષરમ્ ।
સ્તોત્રં ચ કવચં તદ્વૈ શ઼ૃણુ ત્વં કમલેશ્વરિ ॥ ૫૪॥

ૐ નમો ભગવતે રાસમણ્ડલેશાય સ્વાહા ।
ઇમં મન્ત્રં કલ્પવૃક્ષં જાનીહિ ષોડશાડક્ષરમ્ ॥ ૫૫॥

ગોલોકે કૃષ્ણ ઈશાય દત્તવાન્ ચ તતઃ પરમ્ ।
બ્રહ્મણે તુ પુરા કૃષ્ણઃ પુષ્કરે દત્તવાઁસ્તથા ॥ ૫૬॥

કુમારાય દત્તવાઁશ્ચ બ્રહ્મા લોકપિતામહઃ ।
બ્રહ્માણ્ડપાવનસ્યાડસ્ય કવચસ્ય હરિઃ સ્વયમ્ ॥ ૫૭॥

ઋષિશ્છન્દશ્ચ ગાયત્રી દેવોડહં ભગવાન્હરિઃ ।
ધમાર્થકામમોક્ષેષુ વિનિયોગઃ સદા મતઃ ॥ ૫૮॥

ત્રિલક્ષવારજપનાત્ સર્વસિદ્ધિપ્રદો ભવેત્ ।
પ્રણવો મે શિરઃ પાતુ નમો રામેશ્વરાય ચ ॥ ૫૯॥

ભાલં પાયાન્નેત્રયુગ્મં નમો રાધેશ્વરાય ચ ।
કૃષ્ણઃ પાયાચ્છ્રોત્રયુગ્મં શ્રીહરિર્ઘ્રાણમિત્યપિ ॥ ૬૦॥

જિહ્વિકાં વહ્નિજાયા તુ કૃષ્ણાય સર્વતો નમઃ ।
શ્રીકૃષ્ણાય સ્વાહેતિ ચ કાષ્ઠં પાતુ ષડક્ષરઃ ॥ ૬૧॥

હ્રીં કૃષ્ણાય નમો વક્ત્રં ક્લીં પૂર્વશ્ચ ભુજદ્વયમ્ ।
નમો ગોપાઙ્ગનેશાય સ્કન્ધાવષ્ટાક્ષરોડવતુ ॥ ૬૨॥

દન્તપઙ્ક્તિમોષ્ઠયુગ્મં નમો ગોપીશ્વરાય ચ ।
ૐ નમો ભગવતે રાસમણ્ડલેશાય સ્વાહા ॥ ૬૩॥

હરિર્વક્ષઃસ્થલં પાતુ મન્ત્રાત્મા ષોડશાક્ષરઃ ।

શ્રીકૃષ્ણાય સ્વાહેતિ ૐ કર્ણયુગ્મં સદાઽવતુ ॥ ૬૪॥

ૐ વિષ્ણવે સ્વાહેતિ ચ કપોલં સર્વતોઽવતુ ।
ૐ હરયે નમ ઇતિ પૃષ્ઠં પાદૌ સદાઽવતુ ॥ ૬૫॥

ૐ ગોવર્ધનધારિણે સ્વાહા સર્વશરીરકમ્ ।
પ્રાચ્યાં માં પાતુ શ્રીકૃષ્ણ આગ્નેય્યાં પાતુ માધવઃ ॥ ૬૬॥

દક્ષિણે પાતુ ગોપીશો નૈરૃત્યાં નન્દનન્દનઃ ।
વારુણ્યાં પાતુ ગોવિન્દો વાયવ્યાં રાધિકેશ્વરઃ ॥ ૬૭॥

ઉત્તરે પાતુ રાસેશ ઐશાન્યામચ્યુતઃ સ્વયમ્ ।
સતતં સર્વતઃ પાતુ હરિર્નારાયણઃ સ્વયમ્ ॥ ૬૮॥

ગુરુમભ્યર્ચ્ય વિધિવદ્ વસ્ત્રાલઙ્કારચન્દનૈઃ ।
સ્નાત્વા તં ચ નમસ્કૃત્ય કવચં ધારયેત્ સુધીઃ ॥ ૬૯॥

કવચસ્ય પ્રસાદેન જીવન્મુક્તો ભવેન્નરઃ ।
યદિ સ્યાત્ સિદ્ધકવચો વિષ્ણુરેવ ભવેત્ પ્રિયે ॥ ૭૦॥

અસ્ય પાઠાન્મહત્પુણ્યં સર્વતીર્થફલં ભવેત્ ।
અપુત્રો લભતે પુત્રમભાર્યો લભતે સતીમ્ ॥ ૭૧॥

વિદ્યાર્થી લભતે વિદ્યાં ધનાર્થી ધનમાપ્નુયાત્ ।
ભ્રષ્ટરાજ્યો લભેદ્રાજ્યમૈશ્વર્યં સિદ્ધિકામનઃ ॥ ૭૨॥

રોગાર્તો મુચ્યતે રોગાદ્બદ્ધો મુચ્યેત બન્ધનાત્ ।
ભક્તિં પ્રાપ્ય હરેશ્ચાન્તે લભતે ધામ ચાક્ષરમ્ ॥ ૭૩॥

ઇહ લોકે સુખં ભુક્ત્વા કૃત્વા કીર્તિં સુદુર્લભામ્ ।
પાર્ષદપ્રવરો ભૂત્વા ગોલોકં ધામ યાતિ ચ ॥ ૭૪॥

એવં ગન્ધર્વપ્રવરઃ ઉપબર્હણસંજ્ઞકઃ ।
રેમે કાલાવશેષં ચ તાભિઃ પત્નીભિરાદરાત્ ॥ ૭૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૨૦૨-અધ્યાયાન્તર્ગતં
નારાયણપ્રોક્તં શ્રીકૃષ્ણસ્તોત્રં તથા કવચં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૨૦૨/૫૪-૭૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 202/54-75..

Proofread by PSA Easwaran

*Narayanaproktam Shri Krishna Stotram*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*